CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D. P.13
Coll. No. 384

Title Janmāṣṭamī vrata

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 384. Subject : Dharma śāstra

Title : Janmāṣṭami vrata

Author : Dīnamaṇiśaṅkara Scribe : —

Date of the work : — Date of the Ms. : V.S. 2022

Place of the work : — Place of the Ms. : —

Size : 8.3" by 4.3" Extent : 29 foll

Language : Sanskrit. Script : Devanāgarī

Remarks :

॥श्रीगणेशायनमः॥ अथजन्माष्टमीव्रतं॥पारणंतिथिभांते
१ कार्यं॥नदाहभृगुः॥जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच
॥पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणं॥निषेधोपब्रह्मवैवर्
र्ते॥अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित्॥हन्यात्पुरा
कृतंकर्मउपवासार्जितंफलं॥तिथिरष्टगुणंहंतिनक्षत्रंच
चतुर्गुणं॥तस्मात्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमितिमु ॥१॥
ख्यःपक्षः॥एकांतरांतस्त्वनुकल्पः॥यदातुतिथिनक्षत्रयो

रन्यतरस्यैवदिनस्तत्वरात्रौपारणनिषेधादन्यतरांतेपा
रणाभ्यनुज्ञानादिनैवान्यतरांतेकार्यः॥अतएववह्निपु
राणे॥भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणमिति॥
अथजन्माष्टमीप्रयोगः॥तत्रपूर्वदिनेदंतधावनंकृत्वाउ
पवासदिनेप्रातःसूर्यःसोमोयमःकालःभूतान्यायःक्षिति
स्तथा॥दिक्पतिर्वायुर्वह्निश्चआकाशीकर्मसाक्षिणः॥ब्रा
ह्मंशासनमास्थायकल्पध्वमीहसंनिधिरित्युक्त्वासमस्तफ

लपुष्पाक्षतंजलपूर्णंताम्रपात्रमादायप्रासाक्षसिरव्यस्त्र
२ मुकफलकामोवाश्रीकृष्णप्रीतयेकृष्णजन्माष्टमीव्रतंक
रिष्ये॥नीयमग्रहणं॥वासुदेवंसमुद्दिश्यसर्वपापप्र
शांतये॥उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं॥अ
द्यकृष्णाष्टमीदेवीनमश्चंद्रसरोहिणीं॥अर्चइत्वोपवासे
नभोक्ष्येहंपरमेहनी॥एनसोमोक्षकामोस्मियद्गोविंद ॥२॥
त्रियोजितः॥तस्मान्मोचयमात्राहिपतितंशोकसागर

रे॥आजन्ममरणंयावद्यन्मयादुष्कृतंकृतंतत्प्रणाशय
गोविंदप्रसीदपुरुषोत्तमेत्युक्त्वा॥पात्रस्थंजलंक्षिपेत्
ततःकदलीवासोभिराम्रपल्लवयुतसजलपूर्णकिजरो
दीपैःपुष्पमालाभिर्युतमगरुधूपितं॥अग्निस्तद्रक्षका
गरक्षामणिद्वारंन्यस्तमुशलादियुतंमंगलोपेतंषष्ठी
देव्याधिष्ठितंदेवक्याःसूतिकागृहंविधायतस्यसमंता
द्भित्तिषुसकलस्वर्गौकसोदेवदानवगंधर्वादीन्खड्ग

३ चर्मधरवासुदेवंदेवकीकानंदयशोदागर्गगोपीगोपान्कंस
नियुक्तान्गोधेनुकुंजरान्यमुनांतन्मध्येकालीयंअन्य
च्चतत्कालीनंगोकुलचरितंयथासंभवंलिखित्वासूतिका
गृहमध्येपञ्चदर्पणादितमंबुकलशंस्थापयित्वामध्याह्ने
प्राजलैःस्त्रिमधुजैःस्नात्वाअहंरात्रेसपरिवारंकल्पपूजांकरि
ष्यइतिसंकल्प्यकांचनीराजतीताम्रीपैत्तिलीमृन्मयीतथा॥२ ॥३॥
लक्ष्मीमणीमयीचैववर्णकैर्लिखितामथवाप्युक्तान्यतमेनप्रति

मांविधायअग्न्युत्तारणंकृत्वा॥प्रतिमाकंपोजोस्पृष्ट्वातद्देवता
नाममूलमंत्रैःप्रणवादिचतुर्थ्यंतंनामवाअस्मैदेवत्वसंख्या
यैःस्वाहेतिचमंत्रंपठन्प्राणप्रतिष्ठांकुर्यात्॥अस्मादित्यत्र
स्थानेनतत्तद्देवतानामग्राह्यं॥गायद्भिःकिंनराद्यैःसततप
रिगतावेणुवीणानिनादैर्भृंगारादर्शकुंभप्रचुरतरकारैः
किन्नरैःसेव्यमाना॥पर्यंकेस्वासनेयामुदिततरमुखी
पुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतिसुवदनादे

वकीदिव्यरूपाइति॥देवकीबालकंस्तनंपर्यंतेस्तनपायि
५ नं॥श्रीवत्सवक्षसंरंगंतंनीलोत्पलदलछवीमिति श्रीकृष्णार्घ्यं
त्वानमोदेव्यैश्रीयैइति श्रीयंदेवकीसहितंवासुदेवंयशोदा
सहितंयशोदासहितंनंदं॥श्रीकृष्णसहितंबलभद्रदेवंचं
डिकांचनमींवैनमिमंत्रैःपूजयेत्॥तत्रमंत्रः॥योगेश्वरा
यदेवानांयोगीनांपतयेविभोयोगोद्भवायनित्यायगोविं ॥६॥
दायनमोनमः॥स्नानं॥यज्ञेश्वरायदेवायतथायज्ञोद्भवा

यच॥योगानांपतयेनाथगोविंदायनमोनमः॥धूपादौ॥
विश्वेश्वरायदेवायतथाविश्वोद्भवायच॥विश्वस्यपतयेतु
भ्यंगोविंदायनमोनमः॥नैवेद्यं॥गारुडेढ॥यज्ञाययज्ञे
श्वराययज्ञपतयेयज्ञांगायगोविंदायनमोनमः॥इत्या
दोसर्वेषांयज्ञपदस्थानेयोगपदान्युक्त्वायमेवमंत्रः॥स्ना
नेविश्वेश्वरायेत्युक्त्वानैवेद्यंधर्मायधर्मेश्वरायइत्यादिसंद
पूजयामीतिमंत्राःउक्ताः॥ततोगव्यघृतेनाग्नौवसोर्धारा

कचित्तुऽप्युक्तेनेति॥ततोजातकर्मनालच्छेदषष्ठीपूजा
५ नामकर्माणि॥ततश्चंद्रोदयेरोहिणीयुतंचंद्रंस्त्रिद्विजेप्रति
मायांवामंत्रैःसंसंपूज्यारीखतोयैःसंपूर्णमादायरक्तपु
ष्पकरगवंदनं॥जानुभ्यांधरणींगत्वाचंद्रार्घ्यंतुनिवेदयेत्
॥क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भवः॥गृहाणार्घ्यं
शशांकेदंरोहिण्यासहितोमम॥ततोज्योत्स्नायांपतयेतुभ्यं ॥५॥
ज्योतिषांपतयेनमः॥नमस्तेरोहिणीकांतसुधावास

नमोस्तुते॥नमोमंडलदीपायशिरोरत्नायधूर्जटेः॥क
लाभिवर्द्धमानायनमस्तेगरुडगामीनेइतिप्रणमेत्॥त
तःअनंतंवामनंशौरिंवैकुंठंपुरुषोत्तमं॥वासुदेवं
हृषीकेशंमाधवंमधुसूदनं॥वाराहंपुंडरीकाक्षं
सिंहंदैत्यसूदनं॥दामोदरंपद्मनाभंकेशवंगरुडध्व
जं॥गोविंदमच्युतंकृष्णमनंतमपराजितं॥अधोक्षजं
जगद्बीजंस्वर्गस्थित्यंतकारिणं॥अनादिनिधनंविर

६ लुं लोकेशं च त्रिविक्रमं ॥ नारायणं चतुर्बाहुं शंखचक्र
गदाधरं ॥ पीतांबरधरं नित्यं वनमालाविभूषितं ॥ श्री
वत्सांकं जगत्सेतुं श्रीलक्ष्मीधरं हरिं ॥ शरणं त्वं प्रपद्ये
हं सर्वकामार्थसिद्धये ॥ प्रणमामि सदा देवं वासुदेवं
जगत्पतिं ॥ इति मंत्रैः प्रणम्य ॥ त्राहि मां सर्वग श्रीश हरेः स
संसारसागरोगेत्वं ॥ त्राहि मां सर्वपापघ्न दुःखशोकार्णवा ॥६॥
त्प्रभो ॥ सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ॥ देवकी

नंदन श्रीश हरे संसारसागरात्त्वं ॥ त्राहि मां सर्वरोगाघ्न
दुःखशोकार्णवाद्धरे ॥ दुर्गतांस्त्रायसे विष्णो ये स्मरंति स
सकृत्सकृत् ॥ सोहं देवातिदुर्वृत्तस्त्राता मां शोकसागरात्
पुष्कराक्ष निमग्नोहं मायाविज्ञानमस्मरात्त्वं ॥ त्राहि मां देव
देवेश त्वत्तो नान्योस्ति रक्षिता ॥ यद्बाल्ये यच्च कौमारे यौवने यच्च
वार्द्धके ॥ तत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध इति मंत्रैः
प्रार्थयित्वा ॥ ततः स्तोत्रपठनपुराणश्रवणादिना जागरणं

कृत्वाद्वितीयेह्निप्रातःकालिनंनित्यंकृत्वापूर्ववद्देवंपूजयि
त्वाब्राह्मणान्भोजयित्वातेभ्यःसुवर्णधेनुवस्त्रादिकृष्णो
मांप्रीयतामितिदत्वा॥यंदेवंदेवकीदेवीवसुदेवादजीज
नत्॥भौमस्यब्राह्मणोगुप्त्यैततस्मैब्रह्मात्मनेनमः॥सुज
न्मावासुदेवायगोब्राह्मणहितायच॥शांतिरस्तुशिवंचार
स्त्वित्युक्त्वासंपूर्णमेततः॥ततोप्रतिमामुद्धास्यतांब्राह्म ॥७॥
णायदत्वा॥वारुणंकृत्वाव्रतंसमापयेत्॥सर्वायसर्वप

तयेसर्वसंभवायगोविंदायनमोनमः॥इतिपारणायां॥
भूतायभूतपतयेइत्यादिसमापनंचमंत्रैरिति॥ ॥ ॥
इतिजन्माष्टमीव्रतपद्धतिः॥ ॥अथउद्यापनविधिः॥ ॥
युधिष्ठिरउवाच॥उद्यापनविधिंब्रूहिदेवदेवदयानिधे॥येनसं
ति३ पूर्णतांयातिव्रतमेतदनुत्तमं॥श्रीकृष्णउवाच॥पूर्णातिर
थिमनुप्राप्यवित्तचित्तादिसंयुतां॥पूर्वेद्युरेकभक्ताशी
स्वपेन्मांसंस्मरन्हृदि॥प्रातरुत्थायसंस्मृत्यपुण्यतो

९ कान्समाहितः॥निवर्त्यविस्यकंकर्मब्राह्मणान्स्वस्तिवा
चयेत्गुरुमानीयधर्मज्ञंवेदवेदांगपारगं॥ह्येएयाद्विज
श्चैववस्त्रालंकरणादिभिः॥पलेनवातदर्द्धेनतदर्द्धेनवायु
नः॥रत्क्वावाकारयेतत्त्ववित्तरागमविवर्जितःसौवर्णप्र
तिकामायापाद्यार्घ्याचमनीयकं॥पत्नीःसंपाद्यविधिव
त्पूजोपकारणंतथा॥गो॥चर्ममात्रंस्थिथमध्येमंडल ॥९॥
माचरेत्॥ब्रह्माद्यादेवतास्तत्रस्थापयित्वाप्रपूजयेत्

मंडपंरचयेतत्रकदलिस्तंभमंडितं॥चतुर्द्वारसमोपे
फलपुष्पादिसंयुतं॥वितानंतत्रबध्नीयात्विचित्रंचै
वशोभनं॥मंडपेस्थापयेत्कुंभंताम्रमयंशुचिः॥तस्यो
परिन्यसेत्पात्रंराजतंवैणवंतथा॥वाससाछाद्यकौंतेयपू
जयेत्तत्रमांबुधैः॥उपचारैःषोडशभिर्मंत्रैरेभिःसमाहि
तः॥ध्यावाद्यावामृतीलत्यस्वागतादिभिरादरात्॥श्रीगणे
शायनमः॥ॐ॥सुमुखश्चै०थंजन्माष्टमीव्रतउद्यापनम

९ हंकरिष्ये॥तदंगंनिर्विघ्नेनपरिसमाप्त्यर्थंगणपतिपूज
नपूर्वकंब्रह्माचार्यादिऋत्विजांवरणंवरणश्राद्धंचस्व
स्तिवाचनंचकलशाधिष्ठात्रिदेवतानांमंडलाधि
धिष्ठात्रिदेवतानांस्थापनप्रतिष्ठापूजनमाहंकरिष्ये
गणपतिपूजनं॥ब्राह्मणानांवरणं॥वरणश्राद्धं॥स्व
स्तिवाचनं॥अथनियमग्रहणं॥वासुदेवंसमुद्दिश्य ॥९॥
सर्वपापप्रशांतये॥उपवासंकरिष्यामिकृष्णाष्टम्यां

नभस्यहं॥अद्यकृष्णाष्टमीदेवींनभश्चंद्रसरोहिणीं
अर्चयित्वोपवासेनभोक्ष्येहंपरेहनि॥अहंवैमो
क्षकामोस्मियज्ञोविदनियोजितः॥तस्मान्मोचय
यमाद्याहिपतितंशोकसागरे॥आजन्ममरणंया
वद्यन्मयादुष्कृतंकृतं॥तत्प्रणाशयगोविंदप्रसीद
पुरुषोत्तम॥इत्युक्त्वा॥पात्रस्थंजलंक्षिपेत्॥व्रतम
हमाचरिष्ये॥ब्रह्मादिमंडलदेवतानांस्थापनं॥म

१० ध्येकलशस्थापनं॥मूर्त्तिनां अग्न्युत्तारणं॥दक्षिणे
पर्यंकस्थापनं॥तस्योपरिदेवकीवसुदेवस्नानं
अन्नाद्यं॰थूंदेवकीवासुदेवयोः स्नानमहंकरीये
॥अदितिर्द्यौ॰निवं॥इदंविष्णुर्वि॰रा॥देवकीवासु
देवाभ्यांनमः॥आवाहनं॥अथध्यानं॥गायद्भि ॥१०॥
किन्नराद्यैःसततपरिगतावेणुवीणानिनादै
र्भृंगारादर्शकुंभप्रचुरतरकरैःकिंनरैःसेव्यमाना

पर्यंकेस्वासनेयामुदिततरमुखीपुत्रिणीसम्यगास्ते
सादेवीदेवमाताजयतिसुवदनादेवकीदिव्यरूपा॥
देवकीबालकंसुप्तपर्यंकेस्तनपायिनं॥श्रीवत्सवक्ष
संशांतंनीलोत्पलदलदलच्छविंदेवकीवासुदेवाभ्यां
नमः॥ध्यानंसमर्पयामि॥अदितिर्द्यौ॰वे॥इदंविष्णु॰रे
॥आसनंस॰मि॥अदिति॰वं॥इदंवि॰रे॥पाद्यंस॰मि॥
अदिति॰वं॥इदंविष्णु॰रे॥अर्घ्यं॥आचमनं॥अदि

ति०वं॥इदंवि०रे॥स्नानं०मि॥आचमनं॥अदिति०वे॥
११ इदंवि०रे॥वस्त्रं॥आचमनं॥अदिति०वं॥इदंवि०रे॥
यज्ञोपवीतं॥आचमनं॥अदि०वं॥इदं०रे॥गंधद्वारां०
श्रीयं॥चंदनं॥स्वस्तिनइं०तु॥कुंकमं॥अक्षन्नमी०रि
अक्षतान्समपूमि॥अदिति०वे॥इदंविष्णुर्विच०रे॥पु
ष्पेणवासि०तां॥पुष्पाणि॥अदितिर्द्यौ०इदंविष्णु०रे॥ ॥१२॥
वनस्पतिर०तां॥धूपं॥अदि०इदं०रे॥आज्यंचव०ह॥

देवकीवासुदेवाभ्यां०॥दीपं॥अहिर्वभोगै०तः॥अबी
लं॥ऊर्ध्वाम०नाः॥गुलालं॥अदिति०॥इदंविष्णु०रे॥
नैवेद्यं॥आचमनीयं॥याफलिनीर्या०सः॥इदंफ०नि॥
फलं॥हिरण्यगर्भः स०म॥हिरण्यगर्भगर्भस्थं०मे॥मुर
द्रार्पणं॥अत्राद्यपू०र्थंचंद्रमारोहिणीभ्यांनमःपूजनमक
रिष्ये॥चंदनं॥पुष्पं॥धूपंदीपंनैवेद्यं॥अर्घः॥क्षीरोदार्णवर
संभूत अत्रिगोत्रसमुद्भवः॥गृहाणार्घ्यंशशांकमंराहिणी

सहिमोमये॥ अर्घः॥ ज्योत्स्नायापतयेतुभ्यं ज्योतिषांपतयेनमः
१२ नमस्तेरोहिणीकांतसुधावासनमोस्तुते॥ नमोमंडलदीपाय
शिरोरत्नायधूर्जटेः॥ कलाभिवर्द्धमानायनमस्तेखगगामिने॥
इतिप्रणमेत्॥ अनघंवामनंशौरिंवैकुंठंपुरुषोत्तमं॥ वासु
देवंहृषीकेशंमाधवंमधुसूदनं॥ वाराहंपुंडरीकाक्षंनृसिं
हंदैत्यसूदनं॥ दामोदरंपद्मनाभंकेशवंगरुडध्वजं॥ गोविं ॥१२॥
दमच्युतंकृष्णमनंतमपराजितं॥ अधोक्षजंजगद्बीजंसर्ग

स्थित्यंतकारणं॥ अनादिनिधनंविष्णुंलोकेशंचत्रिविक्रमं
॥नारायणंचतुर्बाहुंशंखचक्रगदाधरं॥ पीतांबरधरंनित्यं
वनमालाविभूषितं॥ श्रीवत्सांकंजगत्सेतुंश्रीलक्षश्रीधरंह
रिं॥ शरणंत्वप्रपद्येहंसर्वकामार्थसिद्धये॥ प्रणमामिसदा
देवंवासुदेवंजगत्पतिं॥ इतिमंत्रैःप्रणम्य॥ त्राहिमांसर्वग
श्रीशाहरेःशंमारसागरात्॥ त्राहिमांसर्वपापघ्नदुःखशो
कार्णवात्प्रभो॥ सर्वलोकेश्वरत्राहिपतितंमांभवार्णवे॥ दे

वकीनंदनश्रीशहरे संसारसागरात्॥ त्राहि मां सर्वपाप भ
१३ दुःखशोकार्णवाद्दूरा॥ दुर्गतौ त्राय से विष्णो येस्मरंति सत्स
तसत्वतु॥ सोहं देवातिदुर्वृत्तस्त्राता मां शोकसागरात्॥
पुष्कराक्षनिमग्नोहं मायाविज्ञानमंसरात्॥ त्राहि मां देव
देवेश त्वत्तो नास्तीति तद्धिता॥ यद्बाल्येयच्चकौमारे यौव
ने यच्च वार्द्धके॥ तत्सुण्यं वृद्धिमाप्नोति पापं दह हलायुध ॥१३॥
इतिमंत्रैः प्रार्थयेत्॥ ॥इति देवकीवासुदेवपूजनं॥ ॥

अत्राद्य० थं यशोदानंदकाल्योः पूस० ष्ये॥ देवीवाच०
यशोदानंदकालिभ्यांनमः॥ आवाहनं॥ दे यशोदानंदर
कालिभ्यांनमः॥ आसनं॥ देवीवाच० उ॥ यशोदानंद
कालिभ्यां०॥ पाद्यं॥ देवीवाच० उ॥ अर्घ्यं॥ आचमनं
॥ देवीवा० उ॥ स्नानं॥ आचमनं॥ देवीवाचम० उ॥
चंदनं॥ देवीवा० उ॥ पुष्पं॥ देवीवाच० उ॥ अहीर्व०
तः॥ अबीलं॥ श्यामसखो० पा॥ गुलालं॥ देवीवा

घ॰त्त्वा॥धूपं॥देवीवाच॰त्त्वा॥दीपं॥देवीवा॰त्त्वा॥नैवेद्यं
१५ ॥आचमनं॥याफलिनीर्य॰सः॥हिरण्यगर्भ॰मा॥फ
लंअर्घ्यंमुद्रार्पणं॥देवीवाच॰त्त्वा॥इति स्कृतिपाठः॥
॥ ॥दक्षिणपर्यंके स्थितं तं श्रीलक्ष्मूर्तिं परिहित्वा
उत्तरपर्यंके स्थापयित्वा॥भद्रकालिमूर्तिं परिहित्वा॥
दक्षिणपर्यंके स्थापयित्वा॥अत्राद्य॰र्थं॰श्रीलक्ष्मी ॥१४॥
यगोविंदायगोपीजनवल्लभस्ययथामिलितउपचा
रैः आवर्णैःसह षोडशोभिरुपचारैः पूजनमहंकरि
ष्ये॥सहस्रशीर्षेतिषोडशर्चस्यसूक्तस्यनारायण
ऋषिः॥जगद्बीजपरमपुरुषोदेवता॥अंत्यात्रिष्टु
प्॥अनुष्टुप्छंदः॥प्रथमस्वदेहंन्यासेविनियोगः॥
सहस्रशीर्षेत्यादि॰देहन्यासंस्कृत्वा॥यथादेहेतथा
देवेन्यासंकृत्वाविधानतः॥तत्वायामितिशुनःशेपोव
रुणःत्रिष्टुप्वरुणआराधनेविनियोगः॥तत्वायामि॰

षीः॥ वंवरुणाय॰ सर्वोपचारार्थे गंधपुष्पं॥ कलशस्य
२५ मुखे ब्रह्मा इत्यादि॥ आगमार्थंतु देवानां गमनार्थं
तु राक्षसान्॥ करोमि घंटा रवंतत्र देवताह्वानलांछि
तं॥ ह्रीं घंटायै॰ सर्वोपचारार्थे गंधपुष्पं॥ अथपीठ
पूजनं॥ कर्णिकायां॥ आधाराय॰॥१॥ प्रकृत्यै॰॥
२॥ कूर्माय॥३॥ अनंताय॰॥४॥ पृथिव्यै॰॥५॥ क्षीर ॥२५॥
निधये॰॥६॥ श्वेतद्वीपाय॰॥७॥ रत्नोज्ज्वलितमंडपाय॰

॥८॥ कल्पवृक्षाय॰॥९॥ स्वर्णवेदिकायै॰॥१०॥ इति
अथकेसरवृत्ते॥ अनंताय॰॥१॥ धाप्य॰॥२॥ आनं
दकंदाय॰॥३॥ संवीनालाय॰॥४॥ प्रकृतिमयपत्रे
भ्यो॰॥५॥ विकारमयकेसरेभ्यो॰॥६॥ पंचाशद्वर्णि
कायै॰॥७॥ अं द्वादशकलात्मने सूर्यमंडलाय॰॥
८॥ उं षोडशकलात्मके सोममंडलाय॰॥ यं दशक
लात्मकवह्निमंडलाय॰॥१०॥ सं सत्वाय॰॥११॥

रंरजसे॰॥१२॥ तंतमसे॰॥१३॥ आंआत्मने॰॥१४॥ अंअं
१८ तरात्मने॰॥१५॥ ह्रिंज्ञानात्मने॰॥१६॥ पूर्वादि अंअधर्मा
य॰॥१॥ धर्माय॰॥२॥ अंज्ञानाय॰॥३॥ ज्ञानाय॰॥४॥
अवैराग्याय॰॥५॥ वैराग्याय॰॥६॥ अनैश्वर्याय॰॥७॥
ऐश्वर्याय॰ पूर्वादिपत्रमध्ये॥ विमलायै॰॥ उत्कर्षिण्यै
नमः॥२॥ ज्ञानायै॰॥३॥ क्रियायै॰॥४॥ योगायै॰॥५॥ ॥२६॥
प्रह्व्यै॰॥६॥ सत्यायै॰॥७॥ ईशानायै॰॥८॥ कर्णिकायां

अनुग्रहायै॰॥९॥ मंडुकादिपरतत्वांतं सर्वशक्ति
कमलासनयोगपीठात्मने नमः॥ पुष्पांजलिं स॰
॥ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्माविष्णुमहेश्व
रऋषयः॥ ऋग्यजुःसामानि छंदांसि॥ चैतन्यरूपि
प्राणशक्तिर्देवतायै॰ हृदि॥ आंबीजाय॰ गुह्ये॥ ह्रीं
शक्तये॰ पादयोः॥ क्रौंकीलकाय॰ सर्वांगे॥ मीलु
न्नगोपाल प्राणप्रतिष्ठापने विनियोगः॥ अं क्रों ह्रीं

क्रौं यंरंलंवंशंषंसंहुंल्हंक्षंहंसः गोपालस्यप्राणइह
१७ प्राणाः॥ॐ श्रांह्रीं क्रौं यंरंलंवंशंषंसंहंक्षंहंसः॥गोपा
लस्यसर्वेंद्रियाणि॥ॐ श्रांह्रीं क्रौं यंरंलंवंशंषंसंहं
ल्हंक्षंहंसः पृथिव्यपतेजोवायुआकाशशब्दस्पर्श
सरूपगंधश्रोत्रत्वक्चक्षुजिह्वाघ्राणप्राणवाक्पा
णिपादपायुपस्थमन॥बुद्धिचित्तअहंकारप्राणापा ॥१७॥
नव्यानउदानसमानरहागत्यसुखंचिरंतिष्ठंतुस्वा

हा॥पंचदशसंस्कारसिध्यर्थंपंचदशप्रणवावृत्तिंक
रिष्ये॥असुनीतेपुनरस्मासुचक्षुःस्वस्ति॥असुनीते
पुनोअस्मासुधारय॰स्वा॥पुनानः॰स्वस्ति॥चत्वारिवा
कपरिमितापदानितानि॰वदंति॥इतिमूर्त्तिनांप्राणप्र
तिष्ठाख्यवा॥अस्यश्रीगोपालस्यमहामंत्रस्यनारद
ऋषयेनमः॥शिरसि॥गायत्रीछंदसे॰॥मुखे॥श्रीगोपा
लकृष्णदेवतायै॰॥क्लींबिजाय॰॥स्वाहाशक्तये॰॥पाद

योः॥ पूजने विनियोगः॥ यत्पुरुषं० ते क्लीं हृदयाय०॥ २

१८ ब्राह्मणोस्य० त॥ क्लूं शिरसे स्वाहा॥ चंद्रमाम० त॥ क्लूं

शिखायै वौषट्॥ नाभ्यासि० न॥ क्लैं कवचाय हुं॥ सप्ता

स्या० श्रं॥ क्लौं नेत्रत्रयाय वौषट्॥ यज्ञेन यज्ञ० वा॥ क्लः

अस्त्राय फट्॥ मत्स्याय नमः॥ मूर्ध्नि॥ कूर्माय नमः॥ पा

दयोः॥ वाराहाय० जंघयोः॥ नृसिंहाय० ललाटे॥ वाम ॥१८॥

नाय० मुखे॥ परशुरामाय० हृदि॥ रामाय० बाह्वो॥ कृष्णा

य० नाभ्यां॥ बुद्धाय० गुह्ये॥ कल्किने० जानुनि॥ केश

वाय०॥ शिरसि॥ नारायणाय० मुखे॥ माधवाय०

ग्रीवायां॥ गोविंदाय०॥ बाह्वोः॥ विष्णवे०॥ हृदये॥ म

धुसूदनाय० पृष्ठे॥ त्रिविक्रमाय० कट्यां॥ वामनाय०

जठरे॥ श्रीधराय० गुह्ये॥ हृषीकेशाय० जंघयोः॥ प

द्मनाभाय० गुल्फयोः॥ दामोदराय० पादयोः॥ इति न्या

सः॥ अथ ध्यानं॥ स्फुरदिंदीवरकांतिकांतिसदृशांब

ह्वितंसप्रियंश्रीवत्सांकमुदारकौस्तुभधरंपीतां
१९ बरंसुंदरंगोपीनांनयनोत्पलार्चिततनुंगोगोपसंघा
वृतंगोविंदकलवेणुवादनपरंदिव्यांगभूषंभजे॥ ॥
ध्यात्वाचतुर्भुजंदेवंशंखचक्रगदाधरं॥पीतांबरयु
गोपेतंलक्ष्मीयुक्तंविभूषितं॥जसकौस्तुभशोभाद्यं
मेघश्यामंसुलोचनं॥श्रीलक्ष्मायगोविंदायगोपीज ॥१९॥
नवल्लभाय॰॥ध्यानंसमर्पयामि॥सहस्रशीर्षापुरु॰

लं॥आगछदेवदेवेशजगद्योतेरमापतो॥कलशेस्मि
न्नधिष्ठानेसंनिधेहिकृपांकुरु॥श्रीलक्ष्मायगोविंदा
यगोपीजनवल्लभाय॰आवाहनं॥पुरुषयेवे॰ति॥आ
सनं॥एतावानस्यमहि॰वि॥देवदेवजगन्नाथगरुडा
सनसंस्थितः॥गृहाणमानसंदिव्यंजगद्धातर्नमोर
स्तुते॥श्रीलक्ष्माण्पाद्यं॥त्रिपादूर्ध्व॰मि॥गंधपुष्पाद्
तोपेतंफलेनचसमन्वितं॥अर्घ्यंगृहाणदेवेशमया॥

दत्तं हि भक्तितः॥ अर्घ्यं॥ तस्माद्विराळ॰ ऋः॥ गंगादिसर्व
२० तीर्थेभ्यो मयानीतं सुशीतलं॥ गृहाणाचमनं सस्त विश्व
कायनमोस्तुते॥ आचमनं॥ दधिक्षौद्रं घृतंसहंकपिला
यासुगंधियत्॥ सुस्वादु मधुरं शौरे मधुपर्कं गृहाणमे॥
मधुपर्कं॥ तस्माद्विरा॰ ऋः॥ गंगादिसर्वतीर्थेभ्यो मयानी
तंसुशीतलं॥ गृहाणाचमनं सस्त विश्वकायनमोस्तुते॥ आ ॥२०॥
चमनं॥ गोतमः सोमो गायत्री॥ श्रीसत्यायगोविंदायगोपी

जनवल्लभाय इत्यर्थे पयस्नाने विनियोगः॥ आप्यायस्व॰ यो॥ श्रीस
त्यायगोविंदायगोपीजनवल्लभायनमः॥ पयस्नानं समर्पयामि
त्वंवरुणउत॰ नः वरुणस्नानं॥ आपोहिष्ठा॰ से॥ आचमनं॥
दधिक्राव्णो वामदेवस्त्रिष्टुप्॥ श्रीसत्यायगो॰ दधि॰ गः॥ दधि
क्राव्णो अकारिषं॰ षत॥ श्रीस॰ मः॥ दधिस्नानं॥ त्वंवरुणउ
तमि॰ नः॥ वारुण॰॥ आपो॰ से॥ आचमनं॥ घृतवतीतिभ
रद्वाजो द्यावापृथिव्यौ जगती॥ घृतवतीभुवनाना॰ सा॥ श्री

२२

ष्णायगो०॥घृतस्नानं॥त्वंवरुण०नः॥वारुणस्नानं॥सिंधुद्वी०त्री॥
आपोहि०सि॥आचमनं॥मधुवातेतिगोतमोविश्वेगायत्री॥श्रीकृष्णा
यगो०मधुस्नानं०गः॥मधुवाता०ऋ०धी॥श्रीक०मः॥मधुस्नानंस०मि॥
त्वंवरुण०नः॥आपोहि०सि॥आचमनं॥रसाद्येतिसोमःपवमानोऽ
पमन्युस्त्रिष्टुप्॥श्रीकृष्णायगो०शर्करास्नानं०गः॥रसाद्यःपयसा०
नः॥शर्करास्नानं॥त्वंवरु०नः॥आपोहिष्ठा०सि॥आचमनं॥पंचा ॥२१॥
मृतेनस्नपनंकरिष्यामिसुरोत्तम॥क्षीरोदनिधिवासायलक्ष्मी

कांतायतेनमः॥पंचामृतस्नानं॥यत्पुरुषे०वि॥मंदाकिनीगौत
मीचयमुनाचसरस्वति॥ताभ्यःस्नानार्थमानीतंगृहाणशिशि
रंजलं॥श्रीकृष्णायगोविंदायगोपीजनवल्लभायनमःस्नान
नं॥तस्माद्विरा०ऋः॥गंगादिसर्वतीर्थेभ्योमयानीतंसुशीत
लं॥गृहाणचमनंकृष्णविश्वकायनमोस्तुते॥आचमनं॥तं
यज्ञंबर्हिषिप्रोक्षन्पुरुषंजातमग्रतःतेनदे०ये॥जंबुनद
रच्यंनडिज्ञासुररोचिषि॥मयोपपादितेतुभ्यंबसनीप्रतिगृ

२२ ध्रुतां॥ वस्त्रं॥ तस्माद्विराळः॥ गंगादिसर्वतीर्थेभ्यो मयानीतं
सुशीतलं॥ गृहाणाचमनं लक्षविश्वकाय नमोस्तुते॥ आ
चमनं॥ तस्माद्यज्ञात्० संभृतं० ये॥ यज्ञोपवीतमिति यज्ञोपवी
तं॥ किरीटकुंडलादीनि कांचिवलययुग्मकं॥ कौस्तुभं व
नमालां च भूषणानि भज स्वभो॥ भूषणानि॥ मलयाचल तस्मा०
संभूतगंधसारं मनोहरं॥ हृदयानंदनं चारु प्रीत्यर्थं प्रतिगृह्य यज्ञं०
तां॥ चंदनं॥ माल्यानि चंपकादीनि यूथिकाविकुलानि च॥ तुल ती॥ ३ ॥२२॥

सीपत्रं मिश्राणि गृहाण सुरसत्तमे॥ तस्माद्श्वा० दश्या० यः॥
पुष्पाणि॥ त्रिविक्रमाय० पादौ पूजयामि॥ श्रीधराय० जा
नुनी पू०॥ माधवाय० गुह्यं पू०॥ विष्णवे० कट्यौ पूजयामि॥
विश्वात्मने० कुक्षौ०॥ लक्ष्माय० नाभिं पू०॥ त्रैलोक्यनाथाय
० हृदयं पू०॥ गोविंदाय० कंठं पू०॥ सहस्रबाहवे० बाहू पू०
त्रैलोक्यपावनाय० मुखं०॥ विश्वरूपे० चक्षुषी०॥ केशवाय०
ललाटं पू०॥ सहस्रशीर्षे० शिरसि०॥ विश्वरूपिणे० सर्वांगं पू०

२३ खड्गाय॰॥पाशिभ्यः॥सुदर्शनाय॰॥कौमोदक्यै॰॥पद्माय॰॥पांच

जन्याय॰॥गरुडाय॰॥लक्ष्म्यै॰॥श्रियै॰॥कमलायै॰॥पद्मायै॰॥पर

मवासायै॰॥हरिप्रियायै॰॥क्षीरोदतनयायै॰॥रमायै॰॥इंदिरा

यै॰॥क्लां हृदयाय॰हृदयदेवतां पू॰॥क्लीं शिरसे स्वाहा शिरसे

देवतां पूजयामि॥क्लूं शिखायै वौषट्॥शिखा देवतां पू॰॥क्लैं

कवचाय हुं कवचाय हुं कवचदेवतां पू॰॥क्लौं नेत्रत्रयाय वौ ॥२३॥

षट्॥नेत्रत्रयाय वौषट् नेत्रदेवतां पू॰॥क्लः अस्त्राय फट् अ

स्त्रदेवतां पूजयामि॥अभीष्टसिद्धिं मे देहि शरणागतवत्सल

॥भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं॥श्रीकृष्णाय गोविंद

य गोपीजनवल्लभाय॰ प्रथमावरणार्चनं॥पूजयामि॥केश

वाय॰॥नारायणाय॰॥माधवाय॰॥गोविंदाय॰॥विष्णवे॰॥म

धुसूदनाय॰॥त्रिविक्रमाय॰॥वामनाय॰॥श्रीधराय॰॥हृ

षीकेशाय॰पद्मनाभाय॰॥दामोदराय॰॥अभिष्टसिद्धिं॰द्वि

तियावरणार्चनं॥श्रीकृ॰द्वितियावरणं पूजयामि॥कीर्त्यै॰

२७

कांत्यै०॥ तुष्ट्यै०॥ पुष्ट्यै०॥ धृत्यै०॥ शांत्यै०॥ क्रियायै०॥ दयायै नमः॥ मेधायै०॥ हर्यायै०॥ हर्षायै०॥ श्रद्धायै० लज्जायै०॥ अभि ष्टसि० तृतियावरणार्चनं॥ तृतीयावरणं पूजयामि॥ पूर्वे इंद्रा य०॥ आग्नेयां अग्नये०॥ दक्षिणे यमाय०॥ नैरृत्यां निरृ तये०॥ पश्चिमे वरुणाय०॥ वायव्यां वायवे०॥ उत्तरे सोमाय नमः॥ ईशान्यां ईशानाय०॥ अभिष्टसि० चतुर्थावरणार्च ॥२७॥
नं॥ चतुर्थावरणं॥ चर्चनं॥ पूजयामि॥ वज्राय०॥ शक्तये०॥ दं

डाय०॥ खड्गाय०॥ पाशाय नमः॥ अंकुशाय०॥ गदायै०॥ त्रि शूलाय०॥ अभिष्टसि० समस्तावरणार्चनं॥ समस्तावरणं पूजयामि॥ अथ परिवार देवता पूजा॥ देवकी वसुदेवं च रोहिणी सबलां तथा॥ सात्यकिं चोद्धवाक्रूरानुग्रर सेनादियादवान्॥ नंदं यशोदां तत्कालं प्रसूतां गोपिका गृहे॥ कालिंदिकालियं चैव पूजयेत् नाममंत्रतः॥ ॥ देवक्यै०॥ वसुदेवाय०॥ सबलायै रोहिण्यै नमः॥ ३॥ सात्यकये

नमः॥६॥उद्धवाय०॥५॥=अक्रूरायनमः॥६॥उग्रसेना
२५ दियादवेभ्योनमः॥७॥नंदाय०॥८॥यशोदायैनमः॥९॥
या कालिंद्यैनमः॥कालीय०॥यमुरुषं०ते॥वनस्पतिरसोद्भूतकाला
गरुसमन्वितं॥धूपंम्गह्यणगोविंदगुणसागरगोपते॥श्रीकृ०मः
धूपंसमर्पयामि॥ब्राह्मणोस्यमुखमासी०त॥आग्नेयंचवर्त्ति०पद्
॥दीपंस०॥चंद्रमामन०त॥शाल्योदनंपायसंचसिताधृतविर ॥२५॥
मिश्रितं॥नानापकान्नसंयुक्तंनैवेद्यंप्रतिगृह्यतां॥श्रीकृ०नैवेद्यं

तस्माद्विरा०रः॥आचमनं॥पूगीफलमहद्दिव्यंनागवल्लिदलै
युतं॥कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां॥तांबूलं॥याफ
लिनीर्या०सः॥इदंफलमितिफलं॥हिरण्यगर्भःस०म॥हिर
ण्यगर्भगर्भस्थमितिदक्षिणा॥नमोब्रह्मणे०मि॥मंगलंभ०ते॥
श्रीकृष्णायगोविंदायगोपीजनवल्लभाय०आरात्रिकंस
म०॥नीराजयेत्ततोभक्त्यामंगलंसमुदीरयेत्॥जयमंग
लनिर्घोषैर्देवदेवंसमर्चयेत्॥नीराजनंवंदनंस्त्वा॥स्तवयवं

२६ दनं॥ नाभ्या आसीदंतरिक्षं शी॰ यत्॥ नमस्कारं॥ सप्तास्या॰
प ॐ॥ प्रदक्षिणान्समं॰॥ यज्ञेन यज्ञ॰ देवाः दक्षिणान्न॰॥ ॥
अथ स्तुति पाठः॥ सहस्रशीर्षेत्यादि॥ दत्वा पुष्पांजलिं विद्व
दक्षिणा चतुरःसरं॥ प्रणमेदंडवद्भूमौ भक्तिप्रह्वः पुनःपुनः
॥स्तुत्वा नाना विधैः स्तोत्रैः प्रार्थयेत जगत्पतिं॥ नमस्तेस्तु ज
गन्नाथ देवकीतनयप्रभो॥ वासुदेवात्मजानंत यशोदानं ॥२६॥
दवर्द्धनः॥ गोविंद गोकुलाधार गोपीकांत नमोस्तु ते॥ ॥

इति स्तुतिः॥ अथार्घः॥ नमस्तेस्तु जगन्नाथ देवदेवेश्वर प्र
भो॥ ततस्तु दापयेदर्घ्यं शंखेनोरुदयतः शुचिः॥ १॥ लक्ष्माय प्र
थमं दद्याद्देवकीसहिताय च॥ नारिकेलेन शंखेन दद्याद
र्घ्यं विचक्षणः॥ २॥ लक्ष्माय परया भक्त्या शायेस्त्वा विधान
तः॥ जातः कंसवधार्थाय भूभारोत्तारणाय च॥ कौरवाणां
विनाशाय दैत्यानां निधनाय च॥ गृहाणार्घ्यं मया दत्तं देव
की सहितो हरेः॥ लक्ष्मार्घमंत्रः॥ अथ चंद्रार्घः॥ शंखे कृत्वा

ततस्तोयं सपुष्पफलचंदनं ॥ जानुभ्यामवनीं गत्वा चंद्राया
२१ र्घ्यं निवेदयेत् ॥ क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भवः ॥
गृहाणार्घ्यं मया दत्तं रोहिणीसहितं प्रभो ॥ ज्योत्स्नापते
नमस्तुभ्यं नमस्ते ज्योतिषांपते। नमस्ते रोहिणीकांत गृहा
णार्घ्यं नमोस्तु ते ॥ ३ ॥ इति चंद्रार्घः ॥ इत्थं संप्रार्थ्य दिवेशरात्रौ
जागरणं चरेत् ॥ गीतनृत्यादिना चैव पुराणश्रवणादिभिः ॥ प्र ।२१।
त्युषे विमले स्नानं पूजयित्वा जगद्गुरुं पायसेन तिलाज्यैश्च मूल

मंत्रेण भक्तितः ॥ अष्टोत्तरशतं हुत्वा ततः पुरुषसूक्ततः ॥ इदं वि
ष्णुरिति प्रोक्ता जुहुयाद्वै घृताहुती ॥ होमशेषं समाप्याथ पूर्णाहुति
पुरःसरं ॥ आचार्यं पूजयेद्भक्त्या भूषणाच्छादनादिभिः गामेकां का
पिलां दद्याद्व्रतसंपूर्त्तिहेतवे ॥ पयस्विनीं सुशीलां च सवत्सां स
गुणां तथा ॥ स्वर्णशृंगीं रौप्यखुरां कांस्यदोहनिकायुतां ॥ रक्तपु
च्छां ताम्रपृष्ठीं स्वर्णबिंदयासमन्वितां ॥ वस्त्रकंठां दक्षिणाढ्यां मे
वं संपूर्णतां यजेत् ॥ कपिलाया अभावे पि गौरन्यापि प्रदीयते ॥ न

तोदद्याच्चऋत्विग्भ्यो ऽन्येभ्यश्चयथार्हतः॥ ब्राह्मणान्भोजयेये
२८ त्पश्चाद्दशैतेभ्यश्चदक्षिणांकलशांन्तत्रसंपूर्णान्दद्याच्चैववर
समाहितः॥ शास्त्रानुज्ञांतथानेभ्योभुंजीतसहबंधुभिः॥ एवंकृते
महाराजव्रतोद्यापनकर्मणि॥ निःपापस्तत्क्षणाद्देवजायतेवि
बुधोत्तमः॥ पुत्रपौत्रसमायुक्तोधनधान्यसमाहितः॥ भुक्त्वाभो
गान्चिरंकालमंतेममपुरंव्रजेत्॥ ॥पुण्याहंदीर्घमायुरस्तु ॥२८॥
इत्यादि॥ अस्यजन्माष्टमीव्रतोद्यापनकर्मणःसांगतासिद्ध्यु

र्थंयथासंपन्नेनान्नेनतृप्तिपर्यंतंभोजनेनयथा०श्रे॥ अस्य
२९ ज०दास्य०गांयथा०स्ये॥ अस्य०शय्यां०स्ये॥ अस्य०पदं०स्ये॥
अस्य०कांस्यपात्रं०तस्ये॥ अस्य०तिलपात्रं०स्ये॥ अस्य०
उपानहौ०स्ये॥ ॥श्री॥ इतिश्रीभविष्योत्तरेकृष्णयुधि
ष्ठिरसंवादेमोद्यापनंजन्माष्टमीव्रतं॥ ॥श्रीरस्तु॥
संवत्१८७५नावर्षेपोषशुक्लचतुर्थ्यांरवौलिखितंपं०रमारां ॥२९॥
करात्मजपं०दीनमणिशंकरेण॥ ॥शुभंभवतु॥ ॥श्री॥

२९ तयेसर्वसंभवाययगोविंदायनमोनमः॥ इतिपारणायां॥
भूतायभूतपतयेइत्यादिसमापनंचमंत्रैरिति॥ ॥॥
इतिजन्माष्टमीव्रतपद्धतिः॥ ॥ इतिसमाप्तः॥ ॥
युधिष्ठिरउवाच॥जन्माष्टमी॥उद्यापनं॥ ॥श्रीरस्तु
॥श्रीगणेशाय
२९